ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

# चतुर्थ काण्डे – प्रथमः प्रश्नः

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2021**

1. This replaces the earlier version 0.0 dated May 31, 2019.

2. We have listened to the Krama Paaraayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 31, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

**Earlier Versions**

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated October 01, 2018 |
| 2nd | Version Number | 0.0 dated May 31, 2019 |

# Table of Contents

4 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ...................................4

4.1 चतुर्थ काण्डे प्रथमः प्रश्नः–अग्निचित्यङ्गमन्त्रपाठाभिधानं.............4

==============================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 4 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 4.1 चतुर्थ काण्डे प्रथमः प्रश्नः–अग्निचित्यङ्गमन्त्रपाठाभिधानं

**T.S.4.1.1.1 - Kramam**

युञ्जानः प्रथमम् । प्रथमम् मनः । मनस्तत्वाय । तत्वाय सविता । सविता धियः । धिय इति धियः ॥ अग्निम् ज्योतिः । ज्योतिर् निचाय्य । निचाय्य पृथिव्याः । निचाय्येति नि–चाय्य । पृथिव्या अधि । अध्या । आ ऽभरत् । अभरदित्यभरत् ॥ युक्त्वाय मनसा । मनसा देवान् । देवान्थ् सुवः । सुवर् यतः । यतो धिया । धिया दिवम् । दिवमिति दिवम् ॥ बृहज् ज्योतिः । ज्योतिः करिष्यतः । करिष्यतः सविता । सविता प्र । प्र सुवाति । सुवाति तान् । तानिति तान् ॥ युक्तेन मनसा । मनसा वयम् । वयम् देवस्य । देवस्य सवितुः । सवितुः सवे । सव इति सवे ॥ सुवर्गेयाय शक्त्यै । सुवर्गेयायेति सुवः – गेयाय । शक्त्या इति शक्त्यै ॥ युञ्जते मनः । मन उत । उत युञ्जते । युञ्जते धियः । धियो विप्राः । विप्रा विप्रस्य ।

विप्रस्य बृहतः । बृहतो विपश्चितः । विपश्चित इति विपश्चितः ॥

वि होत्राः । होत्रा दधे । दधे वयुनावित् । वयुनाविदेकः ।

वयुनाविदिति वयुन – वित् । एक इत् । इन् मही । **1 (50/53)**

**T.S.4.1.1.2 - Kramam**

मही देवस्य । देवस्य सवितुः । सवितुः परिष्टुतिः । परिष्टुतिरिति

परि – स्तुतिः ॥ युजे वाम् । वाम् ब्रह्म । ब्रह्म पूर्व्यम् । पूर्व्यम्

नमोभिः । नमोभिर् वि । नमोभिरिति नमः – भिः । वि श्लोकाः ।

श्लोका यन्ति । यन्ति पथ्या । पथ्येव । इव सूराः । सूरा इति सूराः ॥

शृण्वन्ति विश्वे । विश्वे अमृतस्य । अमृतस्य पुत्राः । पुत्रा आ ।

आ ये । ये धामानि । धामानि दिव्यानि । दिव्यानि तस्थुः । तस्थुरिति

तस्थुः ॥ यस्य प्रयाणम् । प्रयाणमनु । प्रयाणमिति प्र – यानम् ।

अन्वन्ये । अन्य इत् । इद् ययुः । ययुर् देवाः । देवा देवस्य । देवस्य

महिमानम् । महिमानमर्चतः । अर्चत इत्यर्चतः ॥ यः पार्थिवानि ।

पार्थिवानि विममे । विममे सः । विमम इति वि – ममे । स एतशः ।

एतशो रजाꣳसि । रजाꣳसि देवः । देवः सविता । सविता महित्वना ।

महित्वनेति महि – त्वना ॥ देव सवितः । सवितः प्र । प्र सुव ।

सुव यज्ञम् । यज्ञम् प्र । प्र सुव । सुव यज्ञपतिम् । 2 (50/53)

**T.S.4.1.1.3 - Kramam**

यज्ञपतिम् भगाय । यज्ञपतिमिति यज्ञ – पतिम् । भगाय दिव्यः ।

दिव्यो गन्धर्वः । गन्धर्व इति गन्धर्वः ॥ केतपूः केतम् । केतपूरिति

केत – पूः । केतम् नः । नः पुनातु । पुनातु वाचः । वाचस्पतिः ।

पतिर् वाचम् । वाचमद्य । अद्य स्वदाति । स्वदाति नः । न इति नः ॥

इमम् नः । नो देव । देव सवितः । सवितर् यज्ञम् । यज्ञम् प्र ।

प्र सुव । सुव देवायुवम् । देवायुव९ँ सखिविदम् । देवायुवमिति

देव – युवम् । सखिविद९ँ सत्राजितम् । सखिविदमिति

सखि – विदम् । सत्राजितम् धनजितम् । सत्राजितमिति

सत्र – जितम् । धनजित९ँ सुवर्जितम् । धनजितमिति धन–जितम् ।

सुवर्जितमिति सुवः – जितम् ॥ ऋचा स्तोमम् । स्तोम९ँ सम् ।

समर्द्धय । अर्द्धय गायत्रेण । गायत्रेण रथन्तरम् । रथन्तरमिति

रथम् – तरम् ॥ बृहद् गायत्रवर्तनि । गायत्रवर्तनीति गायत्र–वर्तनि ॥

देवस्य त्वा । त्वा सवितुः । सवितुः प्रसवे । प्रसवेऽश्विनोः ।
प्रसव इति प्र – सवे । अश्विनोर् बाहुभ्याम् । बाहुभ्याम् पूष्णः ।
बाहुभ्यामिति बाहु–भ्याम् । पूष्णो हस्ताभ्याम् । हस्ताभ्याम् गायत्रेण ।
गायत्रेण छन्दसा । छन्दसा । आ ददे । ददे ऽङ्गिरस्वत् ।
अङ्गिरस्वदभ्रिः । अभ्रिरसि । असि नारिः । नारिरसि । **3 (50/58)**

**T.S.4.1.1.4 - Kramam**

असि पृथिव्याः । पृथिव्याः सधस्थात् । सधस्थादग्निम् ।
सधस्थादिति सध – स्थात् । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् ।
अङ्गिरस्वदा । आ भर । भर त्रैष्टुभेन । त्रैष्टुभेन त्वा । त्वा छन्दसा ।
छन्दसा । आ ददे । ददे ऽङ्गिरस्वत् । अङ्गिरस्वद् बभ्रिः । बभ्रिरसि ।
असि नारिः । नारिरसि । असि त्वया । त्वया वयम् । वय॑ सधस्थे ।
सधस्थ आ । सधस्थ इति सध–स्थे । आऽग्निम् । अग्नि॑ शकेम ।
शकेम खनितुम् । खनितुम् पुरीष्यम् । पुरीष्यम् जागतेन ।
जागतेन त्वा । त्वा छन्दसा । छन्दसा । आ ददे । ददे ऽङ्गिरस्वत् ।
अङ्गिरस्वद्धस्ते । हस्त आधाय । आधाय सविता ।
आधायेत्या – धाय । सविता बिभ्रत् । बिभ्रदभ्रिम् ।

अभ्रिॅं हिरण्ययीम् । हिरण्ययीमिति हिरण्ययीम् ॥ तया ज्योतिः । ज्योतिरजस्रम् । अजस्रमित् । इदग्निम् । अग्निम् खात्वी । खात्वी नः । न आ । आ भर । भरानुष्टुभेन । आनुष्टुभेन त्वा ( ) । आनुष्टुभेनेत्यानु - स्तुभेन । त्वा छन्दसा । छन्दसा । आ ददे । ददे ऽङ्गिरस्वत् । अङ्गिरस्वदित्यङ्गिरस्वत् ॥ **4** (**53/57**)

***(इद् - यज्ञं प्रसुव - नारि - रानुष्टुभेन त्वा छन्दसा - त्रीणि च)***
*(A1)*

**T.S.4.1.2.1 - Kramam**

इमामगृभ्णन्न् । अगृभ्णन् रशनाम् । रशनामृतस्य । ऋतस्य पूर्वे । पूर्व आयुषि । आयुषि विदथेषु । विदथेषु कव्या । कव्येति कव्या ॥ तया देवाः । देवाः सुतम् । सुतमा । आ बभूवुः । बभूवुर्. ऋतस्य । ऋतस्य सामन्न् । सामन्थ् सरम् । सरमारपन्ती । आरपन्तीत्या - रपन्ती ॥ प्रतूर्तं ँवाजिन्न् । प्रतूर्तमिति प्र - तूर्तम् । वाजिन्ना । आ द्रव । द्रव वरिष्ठाम् । वरिष्ठामनु । अनु सम्ँवतम् । सम्ँवतमिति सम् - वतम् ॥ दिवि ते । ते जन्म । जन्म परमम् । परममन्तरिक्षे । अन्तरिक्षे नाभिः । नाभिः पृथिव्याम् । पृथिव्यामधि ।

अधि योनिः । योनिरिति योनिः ॥ युञ्जाथा॒ꣳ रासभम् । रासभं
ँयुवम् । युवमस्मिन्न् । अस्मिन्. यामे । यामे वृषण्वसू । वृषण्वसू
इति वृषण्ण् – वसू ॥ अग्निम् भरन्तम् । भरन्तमस्मयुम् ।
अस्मयुमित्यस्म – युम् ॥ योगेयोगे तवस्तरम् । योगेयोग इति
योगे – योगे । तवस्तरं ँवाजेवाजे । तवस्तरमिति तवः – तरम् ।
वाजेवाजे हवामहे । वाजेवाज इति वाजे – वाजे । हवामह इति
हवामहे ॥ सखाय इन्द्रम् । इन्द्रमूतये । ऊतय इत्यूतये ॥ प्रतूर्वन्ना ।
प्रतूर्वन्निति प्र – तूर्वन्न् । **5** (**50/55**)

**T.S.4.1.2.2 - Kramam**

एहि । इह्यवक्रामन्न् । अवक्रामन्नशस्तीः । अवक्रामन्नित्यव–क्रामन्न् ।
अशस्ती रुद्रस्य । रुद्रस्य गाणपत्यात् । गाणपत्यान् मयोभूः ।
गाणपत्यादिति गाण – पत्यात् । मयोभूरा । मयोभूरिति मयः – भूः ।
एहि । इहीतीहि ॥ उर्वन्तरिक्षम् । अन्तरिक्षमनु । अन्विहि ।
इहि स्वस्तिगव्यूतिः । स्वस्तिगव्यूतिरभयानि । स्वस्तिगव्यूतिरिति
स्वस्ति – गव्यूतिः । अभयानि कृण्वन् । कृण्वन्निति कृण्वन्न् ॥
पूष्णा सयुजा । सयुजा सह । सयुजेति स – युजा । सहेति सह ॥

पृथिव्याः सधस्थात् । सधस्थादग्निम् । सधस्थादितिसध – स्थात् ।
अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् । अङ्गिरस्वदच्छ । अच्छेहि ।
इह्यग्निम् । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् । अङ्गिरस्वदच्छ ।
अच्छेमः । इमोऽग्निम् । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् ।
अङ्गिरस्वद् भरिष्यामः । भरिष्यामोऽग्निम् । अग्निम् पुरीष्यम् ।
पुरीष्यमङ्गिरस्वत् । अङ्गिरस्वद् भरामः । भराम इति भरामः ॥
अन्वग्निः । अग्निरुषसाम् । उषसामग्रम् । अग्रमख्यत् । अख्यदनु ।
अन्वहानि । अहानि प्रथमः । प्रथमो जातवेदाः । जातवेदा इति
जात – वेदाः ॥ अनु सूर्यस्य । सूर्यस्य पुरुत्रा । **6 (50/56)**

**T.S.4.1.2.3 - Kramam**

पुरुत्रा च । पुरुत्रेति पुरु – त्रा । च रश्मीन् । रश्मीननु । अनु
द्यावापृथिवी । द्यावापृथिवी आ । द्यावापृथिवी इति द्यावा – पृथिवी ।
आ ततान । ततानेति ततान ॥ आगत्य वाजी । आगत्येत्या – गत्य ।
वाज्यद्ध्वनः । अद्ध्वनः सर्वाः । सर्वा मृधः । मृधो वि ।
वि धूनुते । धूनुत इति धूनुते ॥ अग्निं᳚ सधस्थे । सधस्थे महति ।
सधस्थ इति सध – स्थे । महति चक्षुषा । चक्षुषा नि ।

नि चिकीषते । चिकीषत इति चिकीषते ॥ आक्रम्य वाजिन्न् ।
आक्रम्येत्या – क्रम्य । वाजिन् पृथिवीम् । पृथिवीमग्निम् ।
अग्निमिच्छ । इच्छ रुचा । रुचा त्वम् । त्वमिति त्वम् ॥
भूम्या वृत्वाय । वृत्वाय नः । नो ब्रूहि । ब्रूहि यतः । यतः खनाम ।
खनाम तम् । तं वँयम् । वयमिति वयम् ॥ द्यौस्ते । ते पृष्ठम् ।
पृष्ठम् पृथिवी । पृथिवी सधस्थम् । सधस्थमात्मा । सधस्थमिति
सध – स्थम् । आत्माऽन्तरिक्षम् । अन्तरिक्ष७ं समुद्रः । समुद्रस्ते ।
ते योनिः । योनिरिति योनिः ॥ विख्याय चक्षुषा ।
विख्यायेति वि – ख्याय । चक्षुषा त्वम् । त्वमभि । अभि तिष्ठ ।
तिष्ठ पृतन्यतः । **7 (50/57)**

**T.S.4.1.2.4 - Kramam**

पृतन्यत इति पृतन्यतः ॥ उत् क्राम । क्राम महते । महते सौभगाय ।
सौभगायास्मात् । अस्मादास्थानात् । आस्थानाद् द्रविणोदाः ।
आस्थानादित्या – स्थानात् । द्रविणोदा वाजिन्न् । द्रविणोदा इति
द्रविणः–दाः । वाजिन्निति वाजिन्न् ॥ वय७ं स्याम । स्याम सुमतौ ।
सुमतौ पृथिव्याः । सुमताविति सु – मतौ । पृथिव्या अग्निम् ।

अग्निम् खनिष्यन्तः । खनिष्यन्त उपस्थे । उपस्थे अस्याः । उपस्थ इत्युप-स्थे । अस्या इत्यस्याः ॥ उदक्रमीत् । अक्रमीद् द्रविणोदाः । द्रविणोदा वाजी । द्रविणोदा इति द्रविणः - दाः । वाज्यर्वा । अर्वाऽकः । अकः सः । स लोकम् । लोक॑ सुकृतम् । सुकृतम् पृथिव्याः । सुकृतमिति सु - कृतम् । पृथिव्या इति पृथिव्याः ॥ ततः खनेम । खनेम सुप्रतीकम् । सुप्रतीकमग्निम् । सुप्रतीकमिति सु - प्रतीकम् । अग्नि॑ सुवः । सुवो रुहाणाः । रुहाणा अधि । अधि नाके । नाक उत्तमे । उत्तम इत्युत् - तमे ॥ अपो देवीः । देवीरुप । उप सृज । सृज मधुमतीः । मधुमतीरयक्ष्माय । मधुमतीरिति मधु - मतीः । अयक्ष्माय प्रजाभ्यः । प्रजाभ्य इति प्र - जाभ्यः ॥ तासा॑ स्थानात् । स्थानादुत् । उज् जिहताम् । जिहतामोषधयः । ओषधयः सुपिप्पलाः । सुपिप्पला इति सु - पिप्पलाः ॥ जिघर्म्यग्निम् । **8 (50/58)**

**T.S.4.1.2.5 - Kramam**

अग्निम् मनसा । मनसा घृतेन । घृतेन प्रतिक्ष्यन्तम् । प्रतिक्ष्यन्तम् भुवनानि । प्रतिक्ष्यन्तमिति प्रति - क्ष्यन्तम् । भुवनानि विश्वा ।

विश्वेति विश्वा ॥ पृथुम् तिरश्चा । तिरश्चा वयसा । वयसा बृहन्तम् ।
बृहन्तं ँव्यचिष्ठम् । व्यचिष्ठमन्नम् । अन्न॒ँ रभसम् । रभसं ँविदानम् ।
विदानमिति विदानम् ॥ आ त्वा । त्वा जिघर्मि । जिघर्मि वचसा ।
वचसा घृतेन । घृतेनारक्षसा । अरक्षसा मनसा । मनसा तत् ।
तज् जुषस्व । जुषस्वेति जुषस्व ॥ मर्यश्रीः स्पृहयद्वर्णः । मर्यश्रीरिति
मर्य–श्रीः । स्पृहयद्वर्णो अग्निः । स्पृहयद्वर्ण इति स्पृहयत् – वर्णः ।
अग्निर् न । नाभिमृशे । अभिमृशे तनुवा । अभिमृश इत्यभि–मृशे ।
तनुवा जर्.हृषाणः । जर्.हृषाण इति जर्.हृषाणः ॥ परि वाजपतिः ।
वाजपतिः कविः । वाजपतिरिति वाज – पतिः । कविरग्निः ।
अग्निर्. हव्यानि । हव्यान्यक्रमीत् । अक्रमीदित्यक्रमीत् ॥ दधद्
रत्नानि । रत्नानि दाशुषे । दाशुष इति दाशुषे ॥ परि त्वा । त्वाऽग्ने ।
अग्ने पुरम् । पुरं ँवयम् । वयं ँविप्रम् । विप्र॒ँ सहस्य । सहस्य
धीमहि । धीमहीति धीमहि ॥ धृषद्वर्णम् दिवेदिवे । धृषद्वर्णमिति
धृषत् – वर्णम् । दिवेदिवे भेत्तारम् ( ) । दिवेदिव इति दिवे–दिवे ।

भेत्तारम् भङ्गुरावतः । भङ्गुरावत इति भङ्गुर - वतः ॥ त्वमग्ने ।
अग्ने द्युभिः । द्युभिस्त्वम् । द्युभिरिति द्यु - भिः । त्वमाशुशुक्षणिः ।
आशुशुक्षणि स्त्वम् । त्वमद्भ्यः । अद्भ्यस्त्वम् । अद्भ्य
इत्यत् - भ्यः । त्वमश्मनः । अश्मनस्परि । परीति परि ॥
त्वं ँवनेभ्यः । वनेभ्यस्त्वम् । त्वमोषधीभ्यः । ओषधीभ्यस्त्वम् ।
ओषधीभ्य इत्योषधि - भ्यः । त्वम् नृणाम् । नृणाम् नृपते ।
नृपते जायसे । नृपत इति नृ - पते । जायसे शुचिः ।
शुचिरिति शुचिः ॥ **9** (**70/81**) ***(प्रतूर्वन्थ् - सूर्यस्य - तिष्ठ - जिघर्मि - भेत्तारं - ँविं॒शतिश्च) (A2)***

**T.S.4.1.3.1 - Kramam**

देवस्य त्वा । त्वा सवितुः । सवितुः प्रसवे । प्रसवेऽश्विनोः ।
प्रसव इति प्र - सवे । अश्विनोर् बाहुभ्याम् । बाहुभ्याम् पूष्णः ।
बाहुभ्यामिति बाहु - भ्याम् । पूष्णो हस्ताभ्याम् । हस्ताभ्याम्
पृथिव्याः । पृथिव्याः सधस्थे । सधस्थेऽग्निम् । सधस्थ इति
सध - स्थे । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् । अङ्गिरस्वत्
खनामि । खनामीति खनामि ॥ ज्योतिष्मन्तम् त्वा । त्वाऽग्ने ।

अग्ने सुप्रतीकम् । सुप्रतीकमजस्रेण । सुप्रतीकमिति सु–प्रतीकम् ।
अजस्रेण भानुना । भानुना दीद्यानम् । दीद्यानमिति दीद्यानम् ॥
शिवम् प्रजाभ्यः । प्रजाभ्योऽहिꣳसन्तम् । प्रजाभ्य इति प्र–जाभ्यः ।
अहिꣳसन्तम् पृथिव्याः । पृथिव्याः सधस्थे । सधस्थेऽग्निम् ।
सधस्थ इति सध – स्थे । अग्निम् पुरीष्यम् । पुरीष्यमङ्गिरस्वत् ।
अङ्गिरस्वत् खनामि । खनामीति खनामि ॥ अपाम् पृष्ठम् ।
पृष्ठमसि । असि सप्रथाः । सप्रथा उरु । सप्रथा इति स – प्रथाः ।
उर्वग्निम् । अग्निम् भरिष्यत् । भरिष्यदपरावपिष्ठम् ।
अपरावपिष्ठमित्यपरा – वपिष्ठम् ॥ वर्द्धमानम् महः । मह आ ।
आ च । च पुष्करम् । पुष्करम् दिवः । दिवो मात्रया ।
मात्रया वरिणा । वरिणा प्रथस्व । प्रथस्वेति प्रथस्व ॥ शर्म च ।
च स्थः । स्थो वर्म । **10 (50/57)**

**<u>T.S.4.1.3.2 - Kramam</u>**

वर्म च । च स्थः । स्थो अच्छिद्रे । अच्छिद्रे बहुले ।
अच्छिद्रे इत्यच्छिद्रे । बहुले उभे । बहुले इति बहुले । उभे इत्युभे ॥
व्यचस्वती सम् । व्यचस्वती इति व्यचस्वती । सं ँवसाथाम् ।

वसाथाम् भर्तम् । भर्तमग्निम् । अग्निम् पुरीष्यम् । पुरीष्यमिति पुरीष्यम् ॥ सं वसाथाम् । वसाथाऽ सुवर्विदा । सुवर्विदा समीची । सुवर्विदेति सुवः – विदा । समीची उरसा । समीची इति समीची । उरसा त्मना । त्मनेतित्मना ॥ अग्निमन्तः । अन्तर् भरिष्यन्ती । भरिष्यन्ती ज्योतिष्मन्तम् । भरिष्यन्ती इति भरिष्यन्ती । ज्योतिष्मन्तमजस्रम् । अजस्रमित् । इदितीत् ॥ पुरीष्योऽसि । असि विश्वभराः । विश्वभरा इति विश्व–भराः ॥ अथर्वा त्वा । त्वा प्रथमः । प्रथमो निः । निरमन्थत् । अमन्थदग्ने । अग्न इत्यग्ने ॥ त्वामग्ने । अग्ने पुष्करात् । पुष्करादधि । अद्ध्यथर्वा । अथर्वा निः । निरमन्थत । अमन्थतेत्यमन्थत ॥ मूर्द्ध्नो विश्वस्य । विश्वस्य वाघतः । वाघत इति वाघतः ॥ तमु । उ त्वा । त्वा दद्ध्यङ्ङ् । दध्यङ्ङृषि । ऋषिः पुत्रः । पुत्र ईधे । ईधे अथर्वणः । **11 (50/56)**

**T.S.4.1.3.3 - Kramam**

अथर्वण इत्यथर्वणः ॥ वृत्रहणम् पुरन्दरम् । वृत्रहणमिति वृत्र – हनम् । पुरन्दरमिति पुरम् – दरम् ॥ तमु । उ त्वा । त्वा पाथ्यः । पाथ्यो वृषा । वृषा सम् । समीधे । ईधे दस्युहन्तमम् ।

दस्युहन्तममिति दस्यु – हन्तमम् ॥ धनञ्जयꣳ रणेरणे ।
धनञ्जयमिति धनम् – जयम् । रणेरण इति रणे – रणे ॥
सीद होतः । होतः स्वे । स्व उ । उ लोके । लोके चिकित्वान् ।
चिकित्वान्थ् सादय । सादया यज्ञम् । यज्ञꣳ सुकृतस्य । सुकृतस्य
योनौ । सुकृतस्येति सु – कृतस्य । योनाविति योनौ ॥ देवावीर्
देवान् । देवावीरिति देव–अवीः । देवान्. हविषा । हविषा यजासि ।
यजास्यग्ने । अग्ने बृहत् । बृहद् यजमाने । यजमाने वयः ।
वयो धाः । धा इति धाः ॥ नि होता । होता होतृषदने ।
होतृषदने विदानः । होतृषदन इति होतृ – सदने । विदानस्त्वेषः ।
त्वेषो दीदिवान् । दीदिवाꣳ असदत् । असदथ् सुदक्षः ।
सुदक्ष इति सु – दक्षः ॥ अदब्धव्रतप्रमतिर् वसिष्ठः ।
अदब्धव्रतप्रमतिरित्यदब्धव्रत – प्रमतिः । वसिष्ठः सहस्रम्भरः ।
सहस्रम्भरः शुचिजिह्वः । सहस्रम्भर इति सहस्रम् – भरः ।
शुचिजिह्वो अग्निः । शुचिजिह्व इति शुचि – जिह्वः ।

अग्निरित्यग्निः ॥ सꣳ सीदस्व । सीदस्व महान् । महाꣳ असि ।

असि शोचस्व ( ) । शोचस्व देववीतमः । 12 (50/58)

**T.S.4.1.3.4 - Kramam**

देववीतम इति देव – वीतमः ॥ वि धूमम् । धूममग्ने ।

अग्ने अरुषम् । अरुषम् मियेद्ध्य । मियेद्ध्य सृज । सृज प्रशस्त ।

प्रशस्त दर्.शतम् । प्रशस्तेति प्र–शस्त । दर्.शतमिति दर्.शतम् ॥

जनिष्वा हि । हि जेन्यः । जेन्यो अग्रे । अग्रे अह्नाम् । अह्नाꣳ हितः ।

हितो हितेषु । हितेष्वरुषः । अरुषो वनेषु । वनेष्विति वनेषु ॥

दमेदमे सप्त । दमेदम इति दमे – दमे । सप्त रत्ना । रत्ना दधानः ।

दधानोऽग्निः । अग्निर्. होता । होता नि । नि षसाद ।

ससादा यजीयान् । यजीयानिति यजीयान् ॥ 13 (27/29)

*(स्थ – ईधे – शोचस्व – सप्तविꣳशतिश्च) (A3)*

**T.S.4.1.4.1 - Kramam**

सम् ते । ते वायुः । वायुर् मातरिश्वा । मातरिश्वा दधातु ।

दधातूत्तानायै । उत्तानायै हृदयम् । उत्तानाया इत्युत् – तानायै ।

हृदयं ँयत् । यद् विलिष्टम् । विलिष्टमिति वि – लिष्टम् ॥

देवानां ँयः । यश्चरति । चरति प्राणथेन । प्राणथेन तस्मै । प्राणथेनेति प्र – अनथेन । तस्मै च । च देवि । देवि वषट् । वषडस्तु । अस्तु तुभ्यम् । तुभ्यमिति तुभ्यम् ॥ सुजातो ज्योतिषा । सुजात इति सु–जातः । ज्योतिषा सह । सह शर्म । शर्म वरूथम् । वरूथमा । आऽसदः । असदः सुवः । सुवरिति सुवः ॥ वासो अग्ने । अग्ने विश्वरूपम् । विश्वरूप॑ँ सम् । विश्वरूपमिति विश्व – रूपम् । सं ँव्ययस्व । व्ययस्व विभावसो । विभावसो इति विभा – वसो ॥ उदु । उ तिष्ठ । तिष्ठ स्वद्ध्वर । स्वद्ध्वराव । स्वद्ध्वरेति सु – अद्ध्वर । अवा नः । नो देव्या । देव्या कृपा । कृपेति कृपा ॥ दृशे च । च भासा । भासा बृहता । बृहता सुशुक्वनिः । सुशुक्वनिरा । सुशुक्वनिरिति सु – शुक्वनिः ॥ आऽग्ने । अग्ने याहि । याहि सुशस्तिभिः । सुशस्तिभिरिति सुशस्ति – भिः ॥ **14 (50/56)**

**T.S.4.1.4.2 - Kramam**

ऊर्द्ध्व उ । ऊ षु णः । सु नः । न ऊतये । ऊतये तिष्ठ । तिष्ठा देवः । देवो न । न सविता । सवितेति सविता ॥ ऊर्द्ध्वो वाजस्य ।

वाजस्य सनिता । सनिता यत् । यदञ्जिभिः । अञ्जिभिर् वाघद्भिः । अञ्जिभिरित्यञ्जि - भिः । वाघद्भिर् विह्वयामहे । वाघद्भिरिति वाघत् - भिः । विह्वयामह इति वि - ह्वयामहे ॥ स जातः । जातो गर्भः । गर्भो असि । असि रोदस्योः । रोदस्योरग्ने । अग्ने चारुः । चारुर् विभृतः । विभृत ओषधीषु । विभृत इति वि-भृतः । ओषधीष्वित्योषधीषु ॥ चित्रः शिशुः । शिशुः परि । परि तमाꣳसि । तमाꣳस्यक्तः । अक्तः प्र । प्र मातृभ्यः । मातृभ्यो अधि । मातृभ्य इति मातृ-भ्यः । अधि कनिक्रदत् । कनिक्रदद् गाः । गा इति गाः ॥ स्थिरो भव । भव वीड्वङ्गः । वीड्वङ्ग आशुः । वीड्वङ्ग इति वीडु - अङ्गः । आशुर् भव । भव वाजी । वाज्यर्वन्न् । अर्वन्नित्यर्वन्न् ॥ पृथुर् भव । भव सुषदः । सुषदस्त्वम् । सुषद इति सु - सदः । त्वमग्नेः । अग्नेः पुरीषवाहनः । पुरीषवाहन इति पुरीष - वाहनः ॥ शिवो भव । भव प्रजाभ्यः । **15 (50/56)**

**<u>T.S.4.1.4.3 - Kramam</u>**

प्रजाभ्यो मानुषीभ्यः । प्रजाभ्य इति प्र - जाभ्यः । मानुषीभ्यस्त्वम् । त्वमङ्गिरः । अङ्गिर इत्यङ्गिरः ॥ मा द्यावापृथिवी ।

द्यावापृथिवी अभि । द्यावापृथिवी इति द्यावा – पृथिवी ।
अभि शूशुचः । शूशुचो मा । माऽन्तरिक्षम् । अन्तरिक्षम् मा ।
मा वनस्पतीन् । वनस्पतीनिति वनस्पतीन् ॥ प्रैतु । एतु वाजी ।
वाजी कनिक्रदत् । कनिक्रदन् नानदत् । नानदद् रासभः । रासभः
पत्वा । पत्वेति पत्वा ॥ भरन्नग्निम् । अग्निम् पुरीष्यम् । पुरीष्यम् मा ।
मा पादि । पाद्यायुषः । आयुषः पुरा । पुरेति पुरा ॥ रासभो वाम् ।
वाम् कनिक्रदत् । कनिक्रदथ् सुयुक्तः । सुयुक्तो वृषणा । सुयुक्त इति
सु – युक्तः । वृषणा रथे । रथ इति रथे ॥ स वाम् । वामग्निम् ।
अग्निम् पुरीष्यम् । पुरीष्यमाशुः । आशुर् दूतः । दूतो वहात् ।
वहादितः । इत इतीतः ॥ वृषा ऽग्निम् । अग्निं ँवृषणम् । वृषणम्
भरन्न् । भरन्नपाम् । अपाम् गर्भम् । गर्भ्ँ समुद्रियम् । समुद्रियमिति
समुद्रियम् ॥ अग्न आ । आ याहि ( ) । याहि वीतये । **16 (50/53)**

**T.S.4.1.4.4 - Kramam**

वीतय ऋतम् । ऋतꣳ सत्यम् । सत्यमिति सत्यम् ॥ ओषधयः प्रति ।
प्रति गृह्णीत । गृह्णीताग्निम् । अग्निमेतम् । एतꣳ शिवम् ।
शिवमायन्तम् । आयन्तमभि । आयन्तमित्या – यन्तम् । अभ्यत्र ।

अत्र युष्मान् । युष्मानिति युष्मान् ॥ व्यस्यन् विश्वाः । व्यस्यन्निति वि - अस्यन्न् । विश्वा अमतीः । अमतीररातीः । अरातीर् निषीदन्न् । निषीदन् नः । निषीदन्निति नि - सीदन्न् । नो अप । अप दुर्मतिम् । दुर्मतिꣳ हनत् । दुर्मतिमिति दुः - मतिम् । हनदिति हनत् ॥ ओषधयः प्रति । प्रति मोदद्ध्वम् । मोदद्ध्वमेनम् । एनम् पुष्पावतीः । पुष्पावतीः सुपिप्पलाः । पुष्पावतीरिति पुष्प - वतीः । सुपिप्पला इति सु - पिप्पलाः ॥ अयं ँवः । वो गर्भः । गर्भ ऋत्वियः । ऋत्वियः प्रत्नम् । प्रत्नꣳ सधस्थम् । सधस्थमा । सधस्थमिति सध - स्थम् । आऽसदत् । असददित्यसदत् ॥ **17 (36/42)**

***(सुशस्तिभिः - शिवो भव - याहि - षट्त्रिꣳशच्च) (A4)***

**T.S.4.1.5.1 - Kramam**

वि पाजसा । पाजसा पृथुना । पृथुना शोशुचानः । शोशुचानो बाधस्व । बाधस्व द्विषः । द्विषो रक्षसः । रक्षसो अमीवाः । अमीवा इत्यमीवाः ॥ सुशर्मणो बृहतः । सुशर्मण इति सु - शर्मणः । बृहतः शर्मणि । शर्मणि स्याम् । स्यामग्नेः । अग्नेरहम् । अहꣳ सुहवस्य । सुहवस्य प्रणीतौ । सुहवस्येति सु - हवस्य ।

प्रणीताविति प्र – नीतौ ॥ आपो हि । हि ष्ठ । स्था मयोभुवः ।
मयोभुवस्ताः । मयोभुव इति मयः – भुवः । ता नः । न ऊर्जे ।
ऊर्जे दधातन । दधातनेति दधातन ॥ महे रणाय । रणाय चक्षसे ।
चक्षस इति चक्षसे ॥ यो वः । वः शिवतमः । शिवतमो रसः ।
शिवतम इति शिव – तमः । रसस्तस्य । तस्य भाजयत ।
भाजयतेह । इह नः । न इति नः ॥ उशतीरिव । इव मातरः ।
मातर इति मातरः ॥ तस्मा अरम् । अरम् गमाम । गमाम वः ।
वो यस्य । यस्य क्षयाय । क्षयाय जिन्वथ । जिन्वथेति जिन्वथ ॥
आपो जनयथ । जनयथा च । च नः । न इति नः ॥
मित्रः स॒ꣳसृज्य । 18 (50/54)

**T.S.4.1.5.2 - Kramam**

सꣳसृज्य पृथिवीम् । सꣳसृज्येति सम्–सृज्य । पृथिवीम् भूमिम् ।
भूमिम् च । च ज्योतिषा । ज्योतिषा सह । सहेति सह ॥ सुजातम्
जातवेदसम् । सुजातमिति सु – जातम् । जातवेदसमग्निम् ।
जातवेदसमिति जात – वेदसम् । अग्निं वैँश्वानरम् ।

वैश्वानरं ँविभुम् । विभुमिति वि–भुम् ॥ अयक्ष्माय त्वा । त्वा सम् ।
स॒ꣳ सृजामि । सृजामि प्रजाभ्यः । प्रजाभ्य इति प्र – जाभ्यः ॥
विश्वे त्वा । त्वा देवाः । देवा वैश्वानराः । वैश्वानराः सम् ।
स॒ꣳ सृजन्तु । सृजन्त्वानुष्टुभेन । आनुष्टुभेन छन्दसा ।
आनुष्टुभेनेत्यानु – स्तुभेन । छन्दसा ऽङ्गिरस्वत् । अङ्गिर
स्वदित्यङ्गिरस्वत् ॥ रुद्राः सम्भृत्य । सम्भृत्य पृथिवीम् । सम्भृत्येति
सम् – भृत्य । पृथिवीम् बृहत् । बृहज् ज्योतिः । ज्योतिः सम् ।
समीधिरे । ईधिर इतीधिरे ॥ तेषाम् भानुः । भानुरजस्रः । अजस्र
इत् । इच्छुक्रः । शुक्रो देवेषु । देवेषु रोचते । रोचत इति रोचते ॥
स॒ꣳसृष्टां ँवसुभिः । स॒ꣳसृष्टामिति सम् – सृष्टाम् । वसुभी रुद्रैः ।
वसुभिरिति वसु – भिः । रुद्रैर् धीरैः । धीरैः कर्मण्याम् । कर्मण्याम्
मृदम् । मृदमिति मृदम् ॥ हस्ताभ्याम् मृद्वीम् । मृद्वीम् कृत्वा ।
कृत्वा सिनीवाली । सिनीवाली करोतु । करोतु ताम् । **19 (50/57)**

**T.S.4.1.5.3 - Kramam**

तामिति ताम् ॥ सिनीवाली सुकपर्दा । सुकपर्दा सुकुरीरा ।
सुकपर्देति सु – कपर्दा । सुकुरीरा स्वौपशा ।

सुकुरीरेति सु – कुरीरा । स्वौपशेति सु – औपशा ॥ सा तुभ्यम् । तुभ्यमदिते । अदिते महे । मह आ । ओखाम् । उखाम् दधातु । दधातु हस्तयोः । हस्तयोरिति हस्तयोः ॥ उखाम् करोतु । करोतु शक्त्या । शक्त्या बाहुभ्याम् । बाहुभ्यामदितिः । बाहुभ्यामिति बाहु – भ्याम् । अदितिर् धिया । धियेति धिया ॥ माता पुत्रम् । पुत्रँ यथा । यथोपस्थे । उपस्थे सा । उपस्थ इत्युप – स्थे । साऽग्निम् । अग्निम् बिभर्तु । बिभर्तु गर्भे । गर्भ आ । एत्या ॥ मखस्य शिरः । शिरोऽसि । असि यज्ञस्य । यज्ञस्य पदे । पदे स्थः । पदे इति पदे । स्थ इति स्थः ॥ वसवस्त्वा । त्वा कृण्वन्तु । कृण्वन्तु गायत्रेण । गायत्रेण छन्दसा । छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वत् पृथिवी । पृथिव्यसि । असि रुद्राः । रुद्रास्त्वा । त्वा कृण्वन्तु । कृण्वन्तु त्रैष्टुभेन । त्रैष्टुभेन छन्दसा । छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वदन्तरिक्षम् । अन्तरिक्षमसि । अस्यादित्याः । **20 (50/55)**

**T.S.4.1.5.4 - Kramam**

आदित्यास्त्वा । त्वा कृण्वन्तु । कृण्वन्तु जागतेन । जागतेन छन्दसा । छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वद् द्यौः । द्यौरसि । असि विश्वे ।

विश्वे त्वा । त्वा देवाः । देवा वैश्वानराः । वैश्वानराः कृण्वन्तु ।
कृण्वन्त्वानुष्टुभेन । आनुष्टुभेन छन्दसा । आनुष्टुभेनेत्यानु – स्तुभेन ।
छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वद् दिशः । दिशोऽसि । असि ध्रुवा ।
ध्रुवाऽसि । असि धारय । धारया मयि । मयि प्रजाम् । प्रजा॒ँ रायः ।
प्रजामिति प्र – जाम् । रायस्पोषम् । पोषम् गौपत्यम् । गौपत्य॒ँ
सुवीर्यम् । सुवीर्य॒ँ सजातान् । सुवीर्यमिति सु – वीर्यम् ।
सजातान्. यजमानाय । सजातानिति स–जातान् । यजमानायादित्यै ।
अदित्यै रास्ना । रास्नाऽसि । अस्यदितिः । अदितिस्ते । ते बिलम् ।
बिलम् गृह्णातु । गृह्णातु पाङ्क्तेन । पाङ्क्तेन छन्दसा ।
छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वदित्यङ्गिरस्वत् ॥ कृत्वाय सा ।
सा महीम् । महीमुखाम् । उखाम् मृन्मयीम् । मृन्मयीं ँयोनिम् ।
मृन्मयीमिति मृत् – मयीम् । योनिमग्नये । अग्नय इत्यग्नये ॥ ताम्
पुत्रेभ्यः । पुत्रेभ्यः सम् । सम् प्र ( ) । प्रायच्छत् । अयच्छददितिः ।
अदितिः श्रपयान् । श्रपयानिति । इतीतीति ॥ **21** (**54/59**)

*(मित्रः – करो – त्वन्तरिक्षमसि – प्र – चत्वारि च) (A5)*

**T.S.4.1.6.1 - Kramam**

वसवस्त्वा । त्वा धूपयन्तु । धूपयन्तु गायत्रेण । गायत्रेण छन्दसा ।
छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वद् रुद्राः । रुद्रास्त्वा । त्वा धूपयन्तु ।
धूपयन्तु त्रैष्टुभेन । त्रैष्टुभेन छन्दसा । छन्दसा ऽङ्गिरस्वत् ।
अङ्गिरस्वदादित्याः । आदित्यास्त्वा । त्वा धूपयन्तु । धूपयन्तु
जागतेन । जागतेन छन्दसा । छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वद्
विश्वे । विश्वे त्वा । त्वा देवाः । देवा वैश्वानराः । वैश्वानरा धूपयन्तु ।
धूपयन्त्वानुष्टुभेन । आनुष्टुभेन छन्दसा । आनुष्टुभेनेत्यानु – स्तुभेन ।
छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वदिन्द्रः । इन्द्रस्त्वा । त्वा धूपयतु ।
धूपयत्वङ्गिरस्वत् । अङ्गिरस्वद् विष्णुः । विष्णुस्त्वा । त्वा धूपयतु ।
धूपयत्वङ्गिरस्वत् । अङ्गिरस्वद् वरुणः । वरुणस्त्वा । त्वा धूपयतु ।
धूपयत्वङ्गिरस्वत् । अङ्गिरस्वददितिः । अदितिस्त्वा । त्वा देवी ।
देवी विश्वदेव्यावती । विश्वदेव्यावती पृथिव्याः । विश्वदेव्यावतीति
विश्वदेव्य – वती । पृथिव्याः सधस्थे । सधस्थे ऽङ्गिरस्वत् ।
सधस्थ इति सध – स्थे । अङ्गिरस्वत् खनतु । खनत्ववट । अवट
देवानाम् । देवानाम् त्वा । त्वा पत्नीः । पत्नीर् देवीः । **22 (50/53)**

**T.S.4.1.6.2 - Kramam**

देवीर् विश्वदेव्यावतीः । विश्वदेव्यावतीः पृथिव्याः । विश्वदेव्यावतीरिति विश्वदेव्य – वतीः । पृथिव्याः सधस्थे । सधस्थे ऽङ्गिरस्वत् । सधस्थ इति सध – स्थे । अङ्गिरस्वद् दधतु । दधतूखे । उखे धिषणाः । धिषणास्त्वा । त्वा देवीः । देवीर् विश्वदेव्यावतीः । विश्वदेव्यावतीः पृथिव्याः । विश्वदेव्यावतीरिति विश्वदेव्य – वतीः । पृथिव्याः सधस्थे । सधस्थे ऽङ्गिरस्वत् । सधस्थ इति सध–स्थे । अङ्गिरस्वदभि । अभीन्धताम् । इन्धतामुखे । उखे ग्नाः । ग्नास्त्वा । त्वा देवीः । देवीर् विश्वदेव्यावतीः । विश्वदेव्यावतीः पृथिव्याः । विश्वदेव्यावतीरिति विश्वदेव्य – वतीः । पृथिव्याः सधस्थे । सधस्थे ऽङ्गिरस्वत् । सधस्थ इति सध – स्थे । अङ्गिरस्वच्छ्रपयन्तु । श्रपयन्तूखे । उखे वरूत्रयः । वरूत्रयो जनयः । जनयस्त्वा । त्वा देवीः । देवीर् विश्वदेव्यावतीः । विश्वदेव्यावतीः पृथिव्याः । विश्वदेव्यावतीरिति विश्वदेव्य – वतीः । पृथिव्याः सधस्थे । सधस्थे ऽङ्गिरस्वत् । सधस्थ इति सध – स्थे । अङ्गिरस्वत् पचन्तु । पचन्तूखे । उखे इत्युखे ॥ मित्रैताम् । एतामुखाम् ।

उखाम् पच । पचैषा । एषा मा । मा भेदि । भेदीति भेदि ॥ एताम् ते । ते परि । परि ददामि । ददाम्यभित्यै । अभित्या इत्यभित्यै ॥ अभीमाम् । इमाम् महिना । 23 (50/58)

**T.S.4.1.6.3 - Kramam**

महिना दिवम् । दिवम् मित्रः । मित्रो बभूव । बभूव सप्रथाः । सप्रथा इति स – प्रथाः ॥ उत श्रवसा । श्रवसा पृथिवीम् । पृथिवीमिति पृथिवीम् ॥ मित्रस्य चर्.षणीधृतः । चर्.षणीधृतः श्रवः । चर्.षणीधृत इति चर्.षणि–धृतः । श्रवो देवस्य । देवस्य सानसिम् । सानसिमिति सानसिम् ॥ द्युम्नम् चित्रश्रवस्तमम् । चित्रश्रवस्तममिति चित्रश्रवः – तमम् ॥ देवस्त्वा । त्वा सविता । सवितोत् । उद् वपतु । वपतु सुपाणिः । सुपाणिः स्वङ्गुरिः । सुपाणिरिति सु – पाणिः । स्वङ्गुरिरिति सु – अङ्गुरिः ॥ सुबाहुरुत । सुबाहुरिति सु – बाहुः । उत शक्त्या । शक्त्येति शक्त्या ॥ अपद्यमाना पृथिवि । पृथिव्याशाः । आशा दिशः । दिश आ । आ पृण । पृणेति पृण ॥ उत् तिष्ठ । तिष्ठ बृहती । बृहती भव । भवोर्द्ध्वा । ऊर्द्ध्वा तिष्ठ । तिष्ठ ध्रुवा । ध्रुवा त्वम् । त्वमिति त्वम् ॥ वसवस्त्वा । त्वा । आ छृन्दन्तु ( ) ।

छृन्दन्तु गायत्रेण । गायत्रेण छन्दसा । छन्दसा ऽङ्गिरस्वत् ।

अङ्गिरस्वद् रुद्राः । रुद्रास्त्वा । त्वा । आ छृन्दन्तु ।

छृन्दन्तु त्रैष्टुभेन । त्रैष्टुभेन छन्दसा । छन्दसा ऽङ्गिरस्वत् ।

अङ्गिरस्वदादित्याः । आदित्यास्त्वा । त्वा । आ छृन्दन्तु । छृन्दन्तु

जागतेन । जागतेन छन्दसा । छन्दसा ऽङ्गिरस्वत् । अङ्गिरस्वद्

विश्वे । विश्वे त्वा । त्वा देवाः । देवा वैश्वानराः । वैश्वानरा आ ।

आ छृन्दन्तु । छृन्दन्त्वानुष्टुभेन । आनुष्टुभेन छन्दसा ।

आनुष्टुभेनेत्यानु - स्तुभेन । छन्दसा ऽङ्गिरस्वत् ।

अङ्गिरस्वदित्यङ्गिरस्वत् ॥ **24 (69/73)** *(पत्नी - रिमाᳶ - रुद्रास्त्वाऽऽ च्छृन्दन्त्वे - कान्न विᳶशतिश्च) (A6)*

**T.S.4.1.7.1 - Kramam**

समास्त्वा । त्वाऽग्ने । अग्न ऋतवः । ऋतवो वर्द्धयन्तु । वर्द्धयन्तु

सम्ँवथ्सराः । सम्ँवथ्सरा ऋषयः । सम्ँवथ्सरा इति सं-वथ्सराः ।

ऋषयो यानि । यानि सत्या । सत्येति सत्या ॥ सम् दिव्येन ।

दिव्येन दीदिहि । दीदिहि रोचनेन । रोचनेन विश्वाः । विश्वा आ ।

आ भाहि । भाहि प्रदिशः । प्रदिशः पृथिव्याः । प्रदिश इति
प्र – दिशः । पृथिव्या इति पृथिव्याः ॥ सञ्च । चेद्ध्यस्व ।
इद्ध्यस्वाग्ने । अग्ने प्र । प्र च । च बोधय । बोधयैनम् । एनमुत् ।
उच्च । च तिष्ठ । तिष्ठ महते । महते सौभगाय । सौभगायेति
सौभगाय ॥ मा च । च रिषत् । रिषदुपसत्ता । उपसत्ता ते ।
उपसत्तेत्युप – सत्ता । ते अग्ने । अग्ने ब्रह्माणः । ब्रह्माणस्ते ।
ते यशसः । यशसः सन्तु । सन्तु मा । माऽन्ये । अन्य इत्यन्ये ॥
त्वामग्ने । अग्ने वृणते । वृणते ब्राह्मणाः । ब्राह्मणा इमे ।
इमे शिवः । शिवो अग्ने । अग्ने सम्ँवरणे । **25** (**50/53**)

**T.S.4.1.7.2 - Kramam**

सम्ँवरणे भव । सम्ँवरण इति सं–वरणे । भवा नः । न इति नः ॥
सपत्नहा नः । सपत्नहेति सपत्न – हा । नो अभिमातिजित् ।
अभिमातिजिच्च । अभिमातिजिदित्यभिमाति – जित् । च स्वे ।
स्वे गये । गये जागृहि । जागृह्यप्रयुच्छन्न् ।
अप्रयुच्छन्नित्यप्र–युच्छन्न् ॥ इहैव । एवाग्ने । अग्ने अधि ।
अधि धारय । धारया रयिम् । रयिम् मा । मा त्वा । त्वा नि ।

नि क्रन्न् । क्रन् पूर्वचितः । पूर्वचितो निकारिणः । पूर्वचित इति पूर्व – चितः । निकारिण इति नि – कारिणः ॥ क्षत्रमग्ने । अग्ने सुयमम् । सुयममस्तु । सुयममिति सु – यमम् । अस्तु तुभ्यम् । तुभ्यमुपसत्ता । उपसत्ता वर्द्धताम् । उपसत्तेत्युप – सत्ता । वर्द्धताम् ते । ते अनिष्टृतः । अनिष्टृत इत्यनिष्टृतः ॥ क्षत्रेणाग्ने । अग्ने स्वायुः । स्वायुः सम् । स्वायुरिति सु–आयुः । स॒ रभस्व । रभस्व मित्रेण । मित्रेणाग्ने । अग्ने मित्रधेये । मित्रधेये यतस्व । मित्रधेय इति मित्र – धेये । यतस्वेति यतस्व ॥ सजातानाम् मद्ध्यमस्थाः । सजातानामिति स – जातानाम् । मद्ध्यमस्था एधि । मद्ध्यमस्था इति मद्ध्यम – स्थाः । एधि राज्ञाम् । राज्ञामग्ने । अग्ने विहव्यः । विहव्यो दीदिहि । विहव्य इति वि – हव्यः । दीदिहीह । इहेतीह ॥ अति निहः । **26 (50/61)**

**T.S.4.1.7.3 - Kramam**

निहो अति । अति स्रिधः । स्रिधोऽति । अत्यचित्तिम् । अचित्तिमति । अत्यरातिम् । अरातिमग्ने । अग्ने इत्यग्ने ॥ विश्वा हि । ह्यग्ने । अग्ने दुरिता । दुरिता सहस्व । दुरितेति दुः – इता । सहस्वाथ ।

अथास्मभ्यम् । अस्मभ्य॒ सहवीराम् । अस्मभ्यमित्यस्म - भ्यम् । सहवीरा॒ रयिम् । सहवीराममिति सह - वीराम् । रयिम् दाः । दा इति दाः ॥ अनाधृष्यो जातवेदाः । अनाधृष्य इत्यना - धृष्यः । जातवेदा अनिष्टृतः । जातवेदा इति जात-वेदाः । अनिष्टृतो विराट् । विराडग्ने । विराडिति वि - राट् । अग्ने क्षत्रभृत् । क्षत्रभृद् दीदिहि । क्षत्रभृदिति क्षत्र - भृत् । दीदिहीह । इहेतीह ॥ विश्वा आशाः । आशाः प्रमुञ्चन्न् । प्रमुञ्चन् मानुषीः । प्रमुञ्चन्निति प्र-मुञ्चन्न् । मानुषीर् भियः । भियः शिवाभिः । शिवाभिरद्य । अद्य परि । परि पाहि । पाहि नः । नो वृधे । वृध इति वृधे ॥ बृहस्पते सवितः । सवितर् बोधय । बोधयैनम् । एन॒ स॒शितम् । स॒शितम् चित् । स॒शितमिति सम् - शितम् । चिथ् सन्तराम् । सन्तरा॒ सम् । सन्तरामिति सम् - तराम् । स॒ शिशाधि । शिशाधीति शिशाधि ॥ वर्द्धयैनम् । एनम् महते । महते सौभगाय ( ) । सौभगाय विश्वे । **27 (50/60)**

**T.S.4.1.7.4 - Kramam**

विश्व एनम् । एनमनु । अनु मदन्तु । मदन्तु देवाः । देवा इति देवाः ॥

अमुत्रभूयादध । अमुत्रभूयादित्यमुत्र – भूयात् । अध यत् ।

यद् यमस्य । यमस्य बृहस्पते । बृहस्पते अभिशस्तेः ।

अभिशस्तेरमुञ्चः । अभिशस्तेरित्यभि – शस्तेः । अमुञ्च

इत्यमुञ्चः ॥ प्रत्यौहताम् । औहतामश्विना । अश्विनामृत्युम् ।

मृत्युमस्मात् । अस्माद् देवानाम् । देवानामग्ने । अग्ने भिषजा ।

भिषजा शचीभिः । शचीभिरिति शचि – भिः ॥ उद् वयम् ।

वयम् तमसः । तमसस्परि । परि पश्यन्तः । पश्यन्तो ज्योतिः ।

ज्योतिरुत्तरम् । उत्तरमित्युत् – तरम् ॥ देवम् देवत्रा । देवत्रा सूर्यम् ।

देवत्रेति देव – त्रा । सूर्यमगन्म । अगन्म ज्योतिः । ज्योतिरुत्तमम् ।

उत्तममित्युत् – तमम् ॥ **28** (**34/37**)

***(इमे शिवो अग्ने – ऽति – सौभगाय – चतुस्त्रिꣳशच्च) (A7)***

**T.S.4.1.8.1 - Kramam**

ऊर्द्ध्वा अस्य । अस्य समिधः । समिधो भवन्ति ।

समिध इति सम् – इधः । भवन्त्यूर्द्ध्वा । ऊर्द्ध्वा शुक्रा ।

शुक्रा शोचीं᳚षि । शोची᳚ष्यग्नेः । अग्नेरित्यग्नेः ॥ द्युमत्तमा

सुप्रतीकस्य । द्युमत्तमेति द्युमत् – तमा । सुप्रतीकस्य सूनोः ।

सूप्रतीकस्येति सु – प्रतीकस्य । सूनोरिति सूनोः ॥ तनूनपादसुरः ।

तनूनपादिति तनू – नपात् । असुरो विश्ववेदाः । विश्ववेदा देवः ।

विश्ववेदा इति विश्व – वेदाः । देवो देवेषु । देवेषु देवः । देव इति

देवः ॥ पथ आ । आ ऽनक्ति । अनक्ति मद्ध्वा । मद्ध्वा घृतेन ।

घृतेनेति घृतेन ॥ मद्ध्वा यज्ञम् । यज्ञम् नक्षसे । नक्षसे प्रीणानः ।

प्रीणानो नराशं᳚सः । नराशं᳚सो अग्ने । अग्न इत्यग्ने ॥ सुकृद्

देवः । सुकृदिति सु – कृत् । देवः सविता । सविता विश्ववारः ।

विश्ववार इति विश्व–वारः ॥ अच्छाऽयम् । अयमेति । एति शवसा ।

शवसा घृतेन । घृतेनेडानः । ईडानो वह्निः । वह्निर् नमसा । नमसेति

नमसा ॥ अग्नि᳚ स्रुचः । स्रुचो अद्ध्वरेषु । अद्ध्वरेषु प्रयथ्सु ।

प्रयथ्स्विति प्रयत् – सु ॥ स यक्षत् । यक्षदस्य । अस्य महिमानम् ।

महिमानमग्नेः । अग्नेः सः । स ईम् । **29** (**50/56**)

**T.S.4.1.8.2 - Kramam**

ई मन्द्रासु । मन्द्रासु प्रयसः । प्रयस इति प्रयसः ॥ वसुश्चेतिष्ठः । चेतिष्ठो वसुधातमः । वसुधातमश्च । वसुधातम इति वसु – धातमः । चेति च ॥ द्वारो देवीः । देवीरनु । अन्वस्य । अस्य विश्वे । विश्वे व्रता । व्रता ददन्ते । ददन्ते अग्नेः । अग्नेरित्यग्नेः ॥ उरुव्यचसो धाम्ना । उरुव्यचस इत्युरु – व्यचसः । धाम्ना पत्यमानाः । पत्यमाना इति पत्यमानाः ॥ ते अस्य । ते इति ते । अस्य योषणे । योषणे दिव्ये । योषणे इति योषणे । दिव्ये न । दिव्ये इति दिव्ये । न योनौ । योनावुषासानक्ता । उषासानक्तेत्युषासानक्ता ॥ इमं ँयज्ञम् । यज्ञमवताम् । अवतामद्ध्वरम् । अद्ध्वरम् नः । न इति नः ॥ दैव्या होतारौ । होतारावूर्द्ध्वम् । ऊर्द्ध्वमद्ध्वरम् । अद्ध्वरम् नः । नोऽग्नेः । अग्नेर् जिह्वाम् । जिह्वामभि । अभि गृणीतम् । गृणीतमिति गृणीतम् ॥ कृणुतम् नः । नः स्विष्टिम् । स्विष्टिमिति सु – इष्टिम् ॥ तिस्रो देवीः । देवीर् बर्.हिः । बर्.हिरा । एदम् । इद॒ꣳ सदन्तु । सदन्त्विडा । इडा सरस्वती । सरस्वती भारती । **30 (50/55)**

## T.S.4.1.8.3 - Kramam

भारतीति भारती ॥ मही गृणाना । गृणानेति गृणाना ॥ तन्नः । नस्तुरीपम् । तुरीपमद्भुतम् । अद्भुतम् पुरुक्षु । पुरुक्षु त्वष्टा । त्वष्टा सुवीरम् । सुवीरमिति सु–वीरम् ॥ रायस्पोषम् । पोषं ँवि । वि ष्यतु । स्यतु नाभिम् । नाभिमस्मे । अस्मे इत्यस्मे ॥ वनस्पतेऽव । अव सृज । सृजा रराणः । रराणस्त्मना । त्मना देवेषु । देवेष्विति देवेषु ॥ अग्निर्. हव्यम् । हव्यꣳ शमिता । शमिता सूदयाति । सूदयातीति सूदयाति ॥ अग्ने स्वाहा । स्वाहा कृणुहि । कृणुहि जातवेदः । जातवेद इन्द्राय । जातवेद इति जात – वेदः । इन्द्राय हव्यम् । हव्यमिति हव्यम् ॥ विश्वे देवाः । देवा हविः । हविरिदम् । इदम् जुषन्ताम् । जुषन्तामिति जुषन्ताम् ॥ हिरण्यगर्भः सम् । हिरण्यगर्भ इति हिरण्य – गर्भः । समवर्तत । अवर्तताग्रे । अग्रे भूतस्य । भूतस्य जातः । जातः पतिः । पतिरेकः । एक आसीत् । आसीदित्यासीत् ॥ स दाधार । दाधार पृथिवीम् । पृथिवीम् द्याम् । द्यामुत । **31 (50/52)**

**T.S.4.1.8.4 - Kramam**

उतेमाम् । इमाम् कस्मै । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ यः प्राणतः । प्राणतो निमिषतः । प्राणत इति प्र – अनतः । निमिषतो महित्वा । निमिषत इति नि–मिषतः । महित्वैकः । महित्वेति महि – त्वा । एक इत् । इद् राजा । राजा जगतः । जगतो बभूव । बभूवेति बभूव ॥ य ईशे । ईशे अस्य । अस्य द्विपदः । द्विपदश्चतुष्पदः । द्विपद इति द्वि – पदः । चतुष्पदः कस्मै । चतुष्पद इति चतुः – पदः । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ य आत्मदाः । आत्मदा बलदाः । आत्मदा इत्यात्म – दाः । बलदा यस्य । बलदा इति बल – दाः । यस्य विश्वे । विश्व उपासते । उपासते प्रशिषम् । उपासत इत्युप – आसते । प्रशिषं यस्य । प्रशिषमिति प्र – शिषम् । यस्य देवाः । देवा इति देवाः ॥ यस्य छाया । छायाऽमृतम् । अमृतं यस्य । यस्य मृत्युः । मृत्युः कस्मै । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ यस्येमे । इमे हिमवन्तः ।

हिमवन्तो महित्वा । हिमवन्त इति हिम - वन्तः । महित्वा यस्य । महित्वेति महि - त्वा । यस्य समुद्रम् । समुद्रꣳ रसया । रसया सह । सहाहुः । 32 (50/61)

**T.S.4.1.8.5 - Kramam**

आहुरित्याहुः ॥ यस्येमाः । इमाः प्रदिशः । प्रदिशो यस्य । प्रदिश इति प्र-दिशः । यस्य बाहू । बाहू कस्मै । बाहू इति बाहू । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ यम् क्रन्दसी । क्रन्दसी अवसा । क्रन्दसी इति क्रन्दसी । अवसा तस्तभाने । तस्तभाने अभ्यैक्षेताम् । तस्तभाने इति तस्तभाने । अभ्यैक्षेताम् मनसा । अभ्यैक्षेतामित्यभि - ऐक्षेताम् । मनसा रेजमाने । रेजमाने इति रेजमाने ॥ यत्रा ऽधि । अधि सूरः । सूर उदितौ । उदितौ व्येति । उदितावित्युत् - इतौ । व्येति कस्मै । व्येतीति वि - एति । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ येन द्यौः । द्यौरुग्रा । उग्रा पृथिवी । पृथिवी च । च दृढे । दृढे येन । दृढे इति दृढे । येन सुवः । सुवः स्तभितम् । स्तभितँ येन । येन नाकः । नाक इति नाकः ॥ यो अन्तरिक्षे ।

अन्तरिक्षे रजसः । रजसो विमानः । विमानः कस्मै । विमान इति वि – मानः । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ आपो ह । ह यत् । यन् महतीः । महतीर् विश्वम् ( ) । विश्वमायन्न् । 33 (50/59)

**T.S.4.1.8.6 - Kramam**

आयन् दक्षम् । दक्षम् दधानाः । दधाना जनयन्तीः । जनयन्तीरग्निम् । अग्निमित्यग्निम् ॥ ततो देवानाम् । देवानाम् निः । निरवर्तत । अवर्ततासुः । असुरेकः । एकः कस्मै । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ यश्चित् । चिदापः । आपो महिना । महिना पर्यपश्यत् । पर्यपश्यद् दक्षम् । पर्यपश्यदिति परि – अपश्यत् । दक्षम् दधानाः । दधाना जनयन्तीः । जनयन्तीरग्निम् । अग्निमित्यग्निम् ॥ यो देवेषु । देवेष्वधि । अधि देवः । देव एकः । एक आसीत् । आसीत् कस्मै । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ 34 (34/35)

*(अग्नेः स – सरस्वती – द्याꣳ – सह – विश्वं – चतुस्त्रिꣳशच्च) (A8)*

**T.S.4.1.9.1 - Kramam**

आकूतिमग्निम् । आकूतिमित्या – कूतिम् । अग्निम् प्रयुजम् ।
प्रयुज॒ स्वाहा । प्रयुजमिति प्र – युजम् । स्वाहा मनः ।
मनो मेधाम् । मेधामग्निम् । अग्निम् प्रयुजम् । प्रयुज॒ स्वाहा ।
प्रयुजमिति प्र – युजम् । स्वाहा चित्तम् । चित्तं ँविज्ञातम् ।
विज्ञातमग्निम् । विज्ञातमिति वि – ज्ञातम् । अग्निम् प्रयुजम् ।
प्रयुज॒ स्वाहा । प्रयुजमिति प्र – युजम् । स्वाहा वाचः ।
वाचो विधृतिम् । विधृतिमग्निम् । विधृतिमिति वि – धृतिम् ।
अग्निम् प्रयुजम् । प्रयुज॒ स्वाहा । प्रयुजमिति प्र – युजम् ।
स्वाहा प्रजापतये । प्रजापतये मनवे । प्रजापतय इति प्रजा–पतये ।
मनवे स्वाहा । स्वाहाऽग्नये । अग्नये वैश्वानराय । वैश्वानराय स्वाहा ।
स्वाहा विश्वे । विश्वे देवस्य । देवस्य नेतुः । नेतुर् मर्तः ।
मर्तो वृणीत । वृणीत सख्यम् । सख्यं ँविश्वे । विश्वे रायः ।
राय इषुद्ध्यसि । इषुद्ध्यसि द्युम्नम् । द्युम्नं ँवृणीत । वृणीत पुष्यसे ।
पुष्यसे स्वाहा । स्वाहा मा । मा सु । सु भित्थाः । भित्था मा ।
मा सु । सु रिषः । रिषो दृ॒ꣳहस्व । दृ॒ꣳहस्व वीडयस्व ।

वीडयस्व सु । स्विति सु ॥ अम्ब धृष्णु । धृष्णु वीरयस्व ।
वीरयस्वाग्निः । **35 (50/58)**

**T.S.4.1.9.2 - Kramam**

अग्निश्च । चेदम् । इदम् करिष्यथः । करिष्यथ इति करिष्यथः ॥
दृꣳहस्व देवि । देवि पृथिवि । पृथिवि स्वस्तये । स्वस्तय आसुरी ।
आसुरी माया । माया स्वधया । स्वधया कृता । स्वधयेति
स्व–धया । कृताऽसि । असीत्यसि ॥ जुष्टम् देवानाम् । देवानामिदम् ।
इदमस्तु । अस्तु हव्यम् । हव्यमरिष्टा । अरिष्टा त्वम् । त्वमुत् ।
उदिहि । इहि यज्ञे । यज्ञे अस्मिन्न् । अस्मिन्नित्यस्मिन्न् ॥ मित्रैताम् ।
एतामुखाम् । उखाम् तप । तपैषा । एषा मा । मा भेदि ।
भेदीति भेदि ॥ एताम् ते । ते परि । परि ददामि । ददाम्यभित्त्यै ।
अभित्त्या इत्यभित्त्यै ॥ द्र्वन्नः सर्पिरासुतिः । द्र्वन्न इति द्रु – अन्नः ।
सर्पिरासुतिः प्रत्नः । सर्पिरासुतिरिति सर्पिः – आसुतिः । प्रत्नो होता ।
होता वरेण्यः । वरेण्य इति वरेण्यः ॥ सहसस्पुत्रः । पुत्रो अद्भुतः ।
अद्भुत इत्यद्भुतः ॥ परस्या अधि । अधि सम्ँवतः । सम्ँवतोऽवरान् ।

सम्ँवत इति सम् - वतः । अवरा॒ऽ अभि । अभ्या ।
आ तर । **36** (50/54)

**T.S.4.1.9.3 - Kramam**

तरेति तर ॥ यत्रा ऽहम् । अहमस्मि । अस्मि तान् । ता॒ऽ अव ।
अवेत्यव ॥ परमस्याः परावतः । परावतो रोहिदश्वः । परावत इति
परा - वतः । रोहिदश्व इह । रोहिदश्व इति रोहित् - अश्वः । इहा ।
आ गहि । गहीति गहि ॥ पुरीष्यः पुरुप्रियः । पुरुप्रियोऽग्ने । पुरुप्रिय
इति पुरु - प्रियः । अग्ने त्वम् । त्वम् तर । तरा मृधः । मृध इति
मृधः ॥ सीद त्वम् । त्वम् मातुः । मातुरस्याः । अस्या उपस्थे ।
उपस्थे विश्वानि । उपस्थ इत्युप - स्थे । विश्वान्यग्ने । अग्ने
वयुनानि । वयुनानि विद्वान् । विद्वानिति विद्वान् ॥ मैनाम् । एनामर्चिषा ।
अर्चिषा मा । मा तपसा । तपसाऽभि । अभि शूशुचः । शूशुचोऽन्तः ।
अन्तरस्याम् । अस्या॒ऽ शुक्रज्योतिः । शुक्रज्योतिर् वि ।
शुक्रज्योतिरिति शुक्र - ज्योतिः । वि भाहि । भाहीति भाहि ॥
अन्तरग्ने । अग्ने रुचा । रुचा त्वम् । त्वमुखायै । उखायै सदने ।
सदने स्वे । स्व इति स्वे ॥ तस्यास्त्वम् । त्व॒ऽ हरसा ।

हरसा तपन्न् ( ) । तपन् जातवेदः । जातवेदः शिवः । जातवेद इति जात – वेदः । शिवो भव । भवेति भव ॥ शिवो भूत्वा । भूत्वा मह्यम् । मह्यमग्ने । अग्नेऽथो । अथो सीद । अथो इत्यथो । सीद शिवः । शिवस्त्वम् । त्वमिति त्वम् ॥ शिवाः कृत्वा । कृत्वा दिशः । दिशः सर्वाः । सर्वाः स्वाम् । स्वां ँयोनिम् । योनिमिह । इहा । आऽसदः । असद इत्यसदः ॥ **37 (70/77)**

*(वीरयस्वा – ऽऽ – तपन् – विꣳशतिश्च) (A9)*

**T.S.4.1.10.1 - Kramam**

यदग्ने । अग्ने यानि । यानि कानि । कानि च । चा । आ ते । ते दारूणि । दारूणि दद्ध्मसि । दद्ध्मसीति दद्ध्मसि ॥ तदस्तु । अस्तु तुभ्यम् । तुभ्यमित् । इद् घृतम् । घृतम् तत् । तज् जुषस्व । जुषस्व यविष्ठ्य । यविष्ठ्येति यविष्ठ्य ॥ यदत्ति । अत्त्युपजिह्विका । उपजिह्विका यत् । उपजिह्विकेत्युप – जिह्विका । यद् वम्रः । वम्रो अतिसर्पति । अतिसर्पतीत्यति – सर्पति ॥ सर्वम् तत् । तदस्तु । अस्तु ते । ते घृतम् । घृतम् तत् । तज् जुषस्व । जुषस्व यविष्ठ्य । यविष्ठ्येति यविष्ठ्य ॥ रात्रिꣳरात्रिमप्रयावम् ।

रात्रि॑ꣳरात्रिमिति रात्रि॑म् – रात्रि॑म् । अप्र॑यावम् भर॑न्तः ।
अप्र॑यावमित्यप्र॑ – यावम् । भर॑न्तोऽश्वाय । अश्वायेव । इव तिष्ठ॑ते ।
तिष्ठ॑ते घासम् । घास॑मस्मै । अस्मा इत्य॑स्मै ॥ रायस्पोषे॑ण । पोषे॑ण
सम् । समिषा । इषा मद॑न्तः । मदन्तोऽग्ने॑ । अग्ने मा । मा ते॑ ।
ते प्रति॑वेशाः । प्रति॑वेशा रिषाम । प्रति॑वेशा इति प्रति – वेशाः ।
रिषामे॑ति रिषाम ॥ नाभा॑ पृथिव्याः । **38 (50/54)**

**T.S.4.1.10.2 - Kramam**

पृथिव्याः स॑मिधानम् । समिधानमग्निम् । समिधानमि॑ति
सम् – इधानम् । अग्निꣳ रायः । रायस्पो॑षाय । पोषा॑य बृहते ।
बृहते ह॑वामहे । हवामह इ॑ति हवामहे ॥ इरम्म॑दम् बृहदु॑क्थम् ।
इरम्मदमि॑तीरम् – मदम् । बृहदु॑क्थं ँयज॑त्रम् । बृहदु॑क्थमिति
बृहत् – उक्थम् । यज॑त्रम् जेता॑रम् । जेता॑रमग्निम् ।
अग्निम् पृ॑तनासु । पृत॑नासु सासहिम् । सासहिमिति सासहिम् ॥
याः सेनाः॑ । सेना॑ अभी॑त्वरीः । अभी॑त्वरीराव्याधि॑नीः ।
अभी॑त्व॑रीरित्य॑भि – इत्वरीः । आव्याधि॑नीरुगणाः ।
आव्याधिनीरित्या॑ – व्याधि॑नीः । उग॑णा उत । उतेत्युत ॥

ये स्तेनाः । स्तेना ये । ये च । च तस्कराः । तस्करा तान् ।
ता॑स्ते । ते अग्ने । अग्नेऽपि । अपि दधामि । दधाम्यास्ये ।
आस्य इत्यास्ये ॥ द॑ष्ट्राभ्याम्मलिम्लून् । मलिम्लून् जम्भ्यैः ।
जम्भ्यैस्तस्करान् । तस्करा॑ उत । उतेत्युत ॥ हनूभ्या॑ स्तेनान् ।
हनूभ्यामिति हनु - भ्याम् । स्तेनान् भगवः । भगवस्तान् । भगव
इति भग - वः । ता॑स्त्वम् । त्वम् खाद । खाद सुखादितान् ।
सुखादितानिति सु - खादितान् ॥ ये जनेषु । जनेषु मलिम्लवः ।
मलिम्लवः स्तेनासः । स्तेनासस्तस्कराः । तस्करा वने ।
वन इति वने ॥ ये कक्षेषु । **39 (50/57)**

**T.S.4.1.10.3 - Kramam**

कक्षेष्वघायवः । अघायवस्तान् । अघायव इत्यघ - यवः । ता॑स्ते ।
ते दधामि । दधामि जम्भयोः । जम्भयोरिति जम्भयोः ॥
यो अस्मभ्यम् । अस्मभ्यमरातीयात् । अस्मभ्यमित्यस्म - भ्यम् ।
अरातीयाद् यः । यश्च । च नः । नो द्वेषते । द्वेषते जनः ।
जन इति जनः ॥ निन्दाद् यः । यो अस्मान् । अस्मान् दिप्सात् ।
दिप्साच् च । च सर्वम् । सर्वम् तम् । तम् मस्मसा ।

मस्मसा कुरु । कुर्विति कुरु ॥ स॑शितम् मे । स॑शितमिति सम् – शितम् । मे ब्रह्म । ब्रह्म स॑शितम् । स॑शितम् ँवीर्यम् । स॑शितमिति सम् – शितम् । वीर्यम् बलम् । बलमिति बलम् ॥ स॑शितम् क्षत्रम् । स॑शितमिति सम् – शितम् । क्षत्रम् जिष्णु । जिष्णु यस्य । यस्याहम् । अहमस्मि । अस्मि पुरोहितः । पुरोहित इति पुरः – हितः ॥ उदेषाम् । एषाम् बाहू । बाहू अतिरम् । बाहू इति बाहू । अतिरमुत् । उद् वर्चः । वर्च उत् । उदु । ऊ बलम् । बलमिति बलम् ॥ क्षिणोमि ब्रह्मणा । ब्रह्मणाऽमित्रान् । अमित्रानुत् । उन्नयामि । नयामि स्वान् । **40** (**50/56**)

**T.S.4.1.10.4 - Kramam**

स्वा॑ अहम् । अहमित्यहम् ॥ दृशानो रुक्मः । रुक्म उर्व्या । उर्व्या वि । व्यद्यौत् । अद्यौद् दुर्मर्.षम् । दुर्मर्.षमायुः । दुर्मर्.षमिति दुः – मर्.षम् । आयुः श्रिये । श्रिये रुचानः । रुचान इति रुचानः ॥ अग्निरमृतः । अमृतो अभवत् । अभवद् वयोभिः । वयोभिर् यत् । वयोभिरिति वयः – भिः । यदेनम् । एनम् द्यौः । द्यौरजनयत् । अजनयथ् सुरेताः । सुरेता इति सु – रेताः ॥ विश्वा रूपाणि ।

रूपाणि प्रति । प्रति मुञ्चते । मुञ्चते कविः । कविः प्र ।
प्रासावीत् । असावीद् भद्रम् । भद्रम् द्विपदे । द्विपदे चतुष्पदे ।
द्विपद इति द्वि – पदे । चतुष्पद इति चतुः – पदे ॥ वि नाकम् ।
नाकमख्यत् । अख्यथ् सविता । सविता वरेण्यः । वरेण्योऽनु । अनु
प्रयाणम् । प्रयाणमुषसः । प्रयाणमिति प्र – यानम् । उषसो वि ।
वि राजति । राजतीति राजति ॥ नक्तोषासा समनसा । समनसा
विरूपे । समनसेति स – मनसा । विरूपे धापयेते । विरूपे इति
वि – रूपे । धापयेते शिशुम् । धापयेते इति धापयेते ।
शिशुमेकम् । एकꣳ समीची । समीची इति समीची ॥ द्यावा क्षाम ।
क्षामा रुक्मः ( ) । रुक्मो अन्तः । **41 (50/57)**

**<u>T.S.4.1.10.5 - Kramam</u>**

अन्तर् वि । वि भाति । भाति देवाः । देवा अग्निम् । अग्निम्
धारयन्न् । धारयन् द्रविणोदाः । द्रविणोदा इति द्रविणः – दाः ॥
सुपर्णोऽसि । सुपर्ण इति सु – पर्णः । असि गरुत्मान् । गरुत्मान्
त्रिवृत् । त्रिवृत् ते । त्रिवृदिति त्रि – वृत् । ते शिरः । शिरो गायत्रम् ।
गायत्रम् चक्षुः । चक्षुः स्तोमः । स्तोम आत्मा । आत्मा साम ।

साम ते । ते तनूः । तनूर् वामदेव्यम् । वामदेव्यम् बृहद्रथन्तरे । वामदेव्यमिति वाम – देव्यम् । बृहद्रथन्तरे पक्षौ । बृहद्रथन्तरे इति बृहत् – रथन्तरे । पक्षौ यज्ञायज्ञियम् । यज्ञायज्ञियम् पुच्छम् । पुच्छम् छन्दाꣳसि । छन्दाꣳस्यङ्गानि । अङ्गानि धिष्णियाः । धिष्णियाः शफाः । शफा यजूꣳषि । यजूꣳषि नाम । नामेति नाम ॥ सुपर्णोऽसि । सुपर्ण इति सु – पर्णः । असि गरुत्मान् । गरुत्मान् दिवम् । दिवम् गच्छ । गच्छ सुवः । सुवः पत । पतेति पत ॥ **42** (**36/43**) ***(नाभा – वने ये – नयामि – क्षामा रुक्मो – ऽष्टात्रिꣳशच्च)*** *(A10)*

**T.S.4.1.11.1 - Kramam**

अग्ने यम् । यं ꣡यज्ञम् । यज्ञमद्ध्वरम् । अद्ध्वरं ꣡विश्वतः । विश्वतः परिभूः । परिभूरसि । परिभूरिति परि – भूः । असीत्यसि ॥ स इत् । इद् देवेषु । देवेषु गच्छति । गच्छतीति गच्छति ॥ सोम याः । यास्ते । ते मयोभुवः । मयोभुव ऊतयः । मयोभुव इति मयः – भुवः । ऊतयः सन्ति । सन्ति दाशुषे । दाशुष इति दाशुषे ॥ ताभिर् नः । नोऽविता । अविता भव । भवेति भव ॥ अग्निर् मूर्द्धा ।

मूर्द्धा भुवः । भुव इति भुवः ॥ त्वम् नः । नः सोम । सोम या ।
या ते । ते धामानि । धामानीति धामानि ॥ तथ् सवितुः । सवितुर्
वरेण्यम् । वरेण्यम् भर्गः । भर्गो देवस्य । देवस्य धीमहि । धीमहीति
धीमहि ॥ धियो यः । यो नः । नः प्रचोदयात् । प्रचोदयादिति
प्र – चोदयात् । अचित्ती यत् । यच् चकृम । चकृमा दैव्ये ।
दैव्ये जने । जने दीनैः । दीनैर् दक्षैः । दक्षैः प्रभूती ।
प्रभूती पूरुषत्वता । प्रभूतीति प्र – भूती ।
पूरुषत्वतेति पूरुष – त्वता ॥ **43 (50/53)**

**T.S.4.1.11.2 - Kramam**

देवेषु च । च सवितः । सवितर् मानुषेषु । मानुषेषु च ।
च त्वम् । त्वम् नः । नो अत्र । अत्र सुवतात् । सुवतादनागसः ।
अनागस इत्यनागसः ॥ चोदयित्री सूनृतानाम् । सूनृतानाम् चेतन्ती ।
चेतन्ती सुमतीनाम् । सुमतीनामिति सु – मतीनाम् ॥ यज्ञम् दधे ।
दधे सरस्वती । सरस्वतीति सरस्वती ॥ पावीरवी कन्या ।
कन्या चित्रायुः । चित्रायुः सरस्वती । चित्रायुरिति चित्र – आयुः ।
सरस्वती वीरपत्नी । वीरपत्नी धियम् । वीरपत्नीति वीर – पत्नी ।

धियम् धात् । धादिति धात् ॥ ग्नाभिरच्छिद्रम् । अच्छिद्र॒ शरणम् । शरण॒ सजोषाः । सजोषा दुराधर्.षम् । सजोषा इति स–जोषाः । दुराधर्.षम् गृणते । दुराधर्.षमिति दुः – आधर्.षम् । गृणते शर्म । शर्म य॒सत् । य॒सदिति य॒सत् ॥ पूषा गाः । गा अनु । अन्वेतु । एतु नः । नः पूषा । पूषा रक्षतु । रक्षत्वर्वतः । अर्वत इत्यर्वतः ॥ पूषा वाजम् । वाज॒ सनोतु । सनोतु नः । न इति नः ॥ शुक्रम् ते । ते अन्यत् । अन्यद् यजतम् । यजतम् ते । ते अन्यत् । अन्यद् विषुरूपे । **44 (50/54)**

**T.S.4.1.11.3 - Kramam**

विषुरूपे अहनी । विषुरूपे इति विषु – रूपे । अहनी द्यौः । अहनी इत्यहनी । द्यौरिव । इवासि । असीत्यसि ॥ विश्वा हि । हि मायाः । माया अवसि । अवसि स्वधावः । स्वधावो भद्राः । स्वधाव इति स्वधा – वः । भद्रा ते । ते पूषन्न् । पूषन्निह । इह रातिः । रातिरस्तु । अस्त्वित्यस्तु ॥ ते ऽवर्द्धन्त । अवर्द्धन्त स्वतवसः । स्वतवसो महित्वना । स्वतवस इति स्व – तवसः । महित्वना ऽऽ नाकम् । महित्वनेति महि – त्वना । आ नाकम् । नाकम् तस्थुः । तस्थुरुरु ।

उरु चक्रिरे । चक्रिरे सदः । सद इति सदः ॥

विष्णुर् यत् । यद्ध । हावत् ।

आवद् वृषणम् । वृषणम् मदच्युतम् । मदच्युतं वयः । मदच्युतमिति

मद – च्युतम् । वयो न । न सीदन्न् । सीदन्नधि । अधि बर्.हिषि ।

बर्.हिषि प्रिये । प्रिय इति प्रिये ॥ प्र चित्रम् । चित्रमर्कम् ।

अर्कम् गृणते । गृणते तुराय । तुराय मारुताय । मारुताय स्वतवसे ।

स्वतवसे भरद्ध्वम् । स्वतवस इति स्व – तवसे ।

भरद्ध्वमिति भरद्ध्वम् ॥ ये सहाꣳसि । सहाꣳसि सहसा ।

सहसा सहन्ते । सहन्ते रेजते । **45 (50/57)**

**T.S.4.1.11.4 - Kramam**

रेजते अग्ने । अग्ने पृथिवी । पृथिवी मखेभ्यः । मखेभ्यः इति

मखेभ्यः ॥ विश्वे देवाः । देवा विश्वे । विश्वे देवाः । देवा इति देवाः ॥

द्यावा नः । नः पृथिवी । पृथिवी इमम् । पृथिवी इति पृथिवी ।

इमꣳ सिध्रम् । सिध्रमद्य । अद्य दिविस्पृशम् । दिविस्पृशमिति

दिवि – स्पृशम् ॥ यज्ञम् देवेषु । देवेषु यच्छताम् । यच्छतामिति

यच्छताम् ॥ प्र पूर्वजे । पूर्वजे पितरा । पूर्वजे इति पूर्व – जे ।

पितरा नव्यसीभिः । नव्यसीभिर् गीर्भिः । गीर्भिः कृणुद्ध्वम् ।
कृणुद्ध्वꣳ सदने । सदने ऋतस्य । सदने इति सदने ।
ऋतस्येत्यृतस्य ॥ आ नः । नो द्यावापृथिवी । द्यावापृथिवी दैव्येन ।
द्यावापृथिवी इति द्यावा – पृथिवी । दैव्येन जनेन । जनेन यातम् ।
यातम् महि । महि वाम् । वां ँवरूथम् । वरूथमिति वरूथम् ॥
अग्निꣳ स्तोमेन । स्तोमेन बोधय । बोधय समिधानः । समिधानो
अमर्त्यम् । समिधान इति सम् – इधानः । अमर्त्यमित्यमर्त्यम् ॥
हव्या देवेषु । देवेषु नः । नो दधत् । दधदिति दधत् ॥ स हव्यवाट् ।
हव्यवाडमर्त्यः । हव्यवाडिति हव्य – वाट् । अमर्त्य उशिक् । उशिग्
दूतः । दूतश्चनोहितः । चनोहित इति चनोहितः ( ) ॥ अग्निर् धिया ।
धिया सम् । समृण्वति । ऋण्वतीत्यृण्वति ॥ शम् नः । नो भवन्तु ।
भवन्तु वाजेवाजे । वाजेवाज इति वाजे – वाजे ॥ **46** (**58/64**)

*(पुरुषत्वता – यजतन्ते अन्यथ् – सहन्ते – चनोहितो – ऽष्टौ च)*
*(A11)*

================

| PraSna Korvai with starting Padams of 1 to 11 Anuvaakams :- |
| --- |
| (युञ्जान – इमामगृभ्णन् – देवस्य – सन्ते – वि पाजसा – वसवस्त्वा – समास्त्वो – र्द्ध्वा – अस्याकूतिं – यँदग्ने यान् – यग्ने यं यँज्ञ – मेकादश) |

| Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :- |
| --- |
| (युञ्जानो – वर्म च स्थ – आदित्यस्त्वा – भारती – स्वाᳪ अहᳪ – षट्चत्वारिᳪशत्) |

| First and Last Padam of First Prasnam of Kandam 4 :- |
| --- |
| (युञ्जानो – वाजेवाजे ) |

॥ हरिः ओं ॥

॥ इति चतुर्थ काण्डे प्रथमः प्रश्नः – क्रम पाठः समाप्तः ॥

================

**Details of Panchati, Padam and Krama Vaakyam for Kandam 4 , Prasanam 1 – (TS 4.1)**

| | Panchati | Padams | Krama Vaakyams |
|---|---|---|---|
| Anuvakam 1 | 4 | 203 | 221 |
| Anuvakam 2 | 5 | 270 | 307 |
| Anuvakam 3 | 4 | 177 | 200 |
| Anuvakam 4 | 4 | 186 | 207 |
| Anuvakam 5 | 4 | 204 | 225 |
| Anuvakam 6 | 3 | 169 | 184 |
| Anuvakam 7 | 4 | 184 | 211 |
| Anuvakam 8 | 6 | 284 | 318 |
| Anuvakam 9 | 3 | 170 | 189 |
| Anuvakam 10 | 5 | 238 | 267 |
| Anuvakam 11 | 4 | 208 | 228 |
| Total → | 46 | 2293 | 2557 |